उद्घाटकः – (स्वामी आत्मप्रियानन्दः, कुलपतिः, विवेकानन्दविश्वविद्यालयः)
मार्गनिर्देशकः – विद्वान् वेङ्कटरमणभट्टः (प्राध्यापकः, संस्कृतविभागः)
सम्पादकः – आवीरलालगङ्गोपाध्यायः (स्नातकतृतीयवर्षीयः)
आलङ्कारिकौ – शुभदीपपालः(स्नातकद्वितीयवर्षीयः)
तथागतमण्डलः (स्नातकोत्तरप्रथमवर्षीयः)
वर्षम् – २, अङ्कः – ५(नेताजीसुभाषचन्द्रवसुः)
प्रकाशदिनाङ्कः – २३.१.२०१६ वासरः – शनिः


| | |
|---|---|
| संस्मरामः देशनायकम्... | सम्पादकस्य |
| सुभाषचन्द्रस्य बाल्यजीवनम् | तुहिनमण्डलः |
| भारतमातुः वीरपुत्रः | शुभङ्करदासः |
| देशनायकः | अनन्तमुखोपाध्यायः |
| सुभाषोऽहम् | राजेश-अधिकारी |
| तथ्यमञ्जूषा | मलयमाइतिः |
| युवकान् प्रति... | अनुवादकः -आवीरलालगङ्गोपाध्यायः |
| विद्यालये | अनुवादकः -आवीरलालगङ्गोपाध्यायः |

## संस्मरामः देशनायकम्...

एवं मे भाति मनसि यद् अधुनातने भारते कीर्तिमत्सु पुरुषेषु रहस्यतमः बोसवर्यः। सदा सर्वदा भारतजनमानसे तस्य विषये नास्ति कुतूहलः इति अचिन्त्यम्। यदैव नेताजिप्रसङ्गः उत्थापितो भवति तदैव प्रायः सर्वे नेतारः स्वमुखस्य दिक्परिवर्तने मतिं ददति। किं वा अस्ति तासु सञ्चिकासु, यासां समानयनेन भविष्यति महदालोडनम् इति चिन्तयामि विवेकवन्तः महाभागाः देशवासिनः स्वमानसे कणशः जानन्ति। यदेव भवतु तस्य जन्मदिवसं मनसि निधाय वयं तं महान्तं देशभक्तम् अत्रास्माकं भित्तिपत्रिकायां नः वाक्पुष्पैः पूजयितुं यत्नपराः इति।

**सम्पादकस्य**

## ॥ सुभाषचन्द्रस्य बाल्यजीवनम् ॥

### तुहिनमण्डलः, स्नातकप्रथमवर्षीयः

१८९७ ईशवीयाब्दे जनुवरीमासस्य त्रयोविंशतितमे दिनाङ्के ओडिशाप्रदेशस्य कटकनगरे पितुः जानकीनाथवसोः गृहे मातुः प्रभावतीदेव्याः क्रोडमलङ्कुर्वन् जनिं लब्धवान् नेताजी सुभाषचन्द्र-वसुः। जानकीनाथस्य चतुर्दशपुत्रेषु अयमासीत् नवमः। आबाल्यात् सुभाषः आसीत् अतीव मेधावी। Anglo-Indian School इति विद्यालये तस्य प्राथमिकशिक्षा प्रारब्धा। तत्र अध्ययनेन सह अनुशासने आचारव्यवहारे चासीत् स कुशलः। किन्तु क्रीडादिषु तस्य कापि रूचिः नासित्। विद्यालयस्य दृष्टिः आङ्गलजनानां दृष्टिरिव आसीत्। तत्र विद्यमानं जातिभेद्भावं भारतद्वेषं च स न असहत।

१९०९ ईशवीयाब्दे जनुवरीमासे सुभाषः तं विद्यालयं त्यक्त्वा कटकनगरस्य Ravenshaw Collegiate School इत्यत्र प्रविष्टवान्। तत्रत्यः प्रधानशिक्षकः वेणीमाधवदासमहोदयः तस्य मनसि नैतिकमूल्यबोधं जागरितवान्। किन्तु तदा तन्मनसि नासीत् कापि मूलनीतिः यामवलम्ब्य जीवनमादर्शतया निर्मातुं शक्यते। अस्मिन्नेव समये सः स्वामिविवेकानन्देन अनुप्राणितः। विवेकानन्दस्य पुस्तकस्य पठनेन तस्य मनसि एका शक्तिः सञ्चारिता। ततः सुभाषः विवेकानन्दस्वामिनं स्वगुरुत्वेन स्वीकृत्य तद्दर्शितमार्गेण जीवनं यापयितुमारब्धवान्।

पञ्चदशवर्षीयः सुभाषः मैट्रिक्परीक्षायामुत्तीर्णः। १९१३ ईशवीयाब्दे मार्चमासे प्रवेशिकापरीक्षायां द्वितीयस्थानमधिकृत्य कलिकातानगर्यां प्रेसिडेन्सिमहाविद्यालयं प्रविष्टवान्। तत्र दर्शनशास्त्रे स्नातको भूत्वा Indian civil Service इत्यध्येतुं १९१९ ईशवीयाब्दे सेप्टेम्बरमासस्य पञ्चदशदिनाङ्के ईङ्ग्लाण्ड्-देशमुद्दिश्य यात्रां कृतवान्॥

## ॥ भारतमातुः वीरपुत्रः ॥

### शुभङ्करदासः, स्नातकप्रथमवर्षीयः

रात्रौ निखिले तमसि समावृते यथा शशी तमसो निराकरणे प्रयतते तथैव वैदेशिकशासनतमसि ये स्वाधीनताप्राप्तये प्रवृत्ताः, तेषु अन्यतमः भारतनभसि सुभासमानः सुभाषचन्द्रः। वैदेशिकान् पराजेतुम्, एकस्मिन् दिवसे स धृतच्छद्मवेशः देशाद् बहिः जार्मानीमगात्। अल्पानामपि वस्तूनां संहतिः कार्यसाधिका इति सुभाषितमनुसरन् सुभाषः हिट्लार्-इत्यनेन समं साक्षात्कारम् अकार्षीत्। परन्तु तत्र व्यर्थमनोरथः सुभाषरथः जापानदेशं प्राप। तत्र रासविहारी वसुः इत्यनेन समं परिचयोऽभूत्। तस्य निर्देशमनुसरन् स भारतीयपराभूतसैनिकान् एकत्रीकृत्य १९४३ ईशवीयाब्दे अक्टोबरमासस्य एकविंशतिदिनाङ्के I.N.A.इत्यस्य नेतृत्वमलञ्चकार। सुभाषनये इमे वर्वरा भोगलोलुपा वैदेशिका न नूनं शान्तमनसा स्वाधीनतां प्रदीत्सवः, एतेषां जघन्यमनस्कानां चौराणां समूलोत्पाटनमेवास्माकमाद्यमुद्देश्यं भूयात् इति।

तदानीन्तने भारते ये नेतारः आसन् ते तु विषकुम्भं पयोमुखमितिवद्। ये वचसा स्वतन्त्रतेप्सवः परन्तु अन्तः ब्रीटिशानुसारिणः। स्वतन्त्रतायै प्रयतते सुभाषाय ते उपजहसुः तस्य गतिम् अवरुरुधुश्च। साहाय्यं कुत्र, स्वमातृपुत्रं शत्रुभ्यः समर्पयितुं ते बहिस्स्थानां पार्श्वे आसन्। अतो सुभाषचन्द्रस्य या गच्छत देहलीम् इति ध्वनिः मृतभारतीयानां मनसि उत्साहपयोऽसिञ्चत् सा वर्वरबाणविघाता सती लक्ष्यप्राप्तिपूर्वमेव दग्धभित्तिकेव भूमौ न्यस्ता। किञ्च, तदा जापानदेशे विस्फोटकविस्फोरणमभूत्। तेन आइ.एन्. ए. इत्यस्य आर्थिकसाहाय्यमपि स्तब्धम्। एवं विविधबाधाविघातात् तस्य नैके सैनिका बद्धाः। स तु देशनायकः किंवदन्ती अधुनापि भारतजनगणवन्द्यः जीवति॥

# ॥ देशनायकः ॥

## अनन्तमुखोपाध्यायः, स्नातकोत्तरद्वितीयवर्षीयः

द्वितीयविश्वयुद्धसमये बोसवर्यः विशिष्टः क्रान्तिकारीति प्रसिद्धिं गतः। मयात्र INA इत्यस्य प्रमुखाक्रमणादिकं वर्ण्यते। १९४३ क्रिस्ताब्दे आजाद्-हिन्द्-फौज् इत्यस्य नेतृत्वं स्वीकृत्य सुभाषचन्द्रः तस्य पञ्चधा विभाजनमकरोत्। ते यथा आजाद् ब्रिगेड्, गान्धि ब्रिगेड्, नेहेरु ब्रिगेड्, सुभाष ब्रिगेड्, झांसि ब्रिगेड् तथा बालसेनागणः इति नामकाः। सुभाषचन्द्रः १९४३ क्रिस्ताब्दस्य अक्टोवरमासस्य एकविंशतितमे दिवसे सिङ्गापुरनगरे आजाद्-हिन्द्-सर्वकारनामकमेकं सर्वकारं निर्मितवान्। वर्मातः तथा जापानदेशतः मुक्तियुद्धस्य सर्वविधं साहाय्यं प्राप्स्यतीति आश्वासं लब्ध्वा सुभाषचन्द्रः नवेम्बरमासे वर्मादेशस्य मउडक् नामके पोताश्रये विस्फोटकं वर्षयामास। यस्मात् सन्त्रस्ताः ब्रिटीशसैनिकाः तं स्थानं त्यक्तवन्तः। इतः परं सुभाषचन्द्रः चट्टग्रामस्य पोताश्रयमाक्रंस्यतीति परिकल्पयामास, परन्तु स १९४४ क्रिस्ताब्दस्य जनवरीमासस्य चतुर्थदिनाङ्कपर्यन्तं रेङ्गुननगरे स्थित्वा प्रधानसेनाशिविरं निर्माय तत्रैव सन्दंशिकाक्रमणं परिचालयामास। तस्मिन्नेव वर्षे मार्चमासस्य नवदशे दिनाङ्के सुभाषचन्द्रस्य INA-सैनिकाः मणिपुरस्य इम्फल्-नगरे तथा नागालैण्ड्-राज्यस्य कोहिमानगर्यां भारतवर्षस्य त्रिवर्णरञ्जितां ध्वजाम् उत्तोलितवन्तः। एवम्प्रकारेण पूर्वभारतस्य १५०-माइलपरिमितं स्थानं आजाद्-हिन्द्-फौज् इत्यस्य अधीनमभवत्। परन्तु इतः परं विविधया समस्यया ग्रस्तः आजाद्-हिन्द्-फौज् पराजयं प्राप्य आत्मसमर्पणमकरोत्। सुभाषचन्द्रोऽपि अन्तर्हितोऽभूत्। यद्यपि सुभाषचन्द्रः तस्य सम्पूर्णं लक्ष्यं साधयितुमसमर्थः अभवत्, परन्तु तथापि तस्य अयं संग्रामः भारतवर्षं स्वतन्त्रतायाः द्वारप्रान्तं प्रापितवान्॥

# ॥ सुभाषोऽहम् ॥

## राजेश-अधिकारी, स्नातकप्रथमवर्षीयः

तदा पञ्चदशवर्षदेशीयोऽहम्। केभ्यश्चिद्दिनेभ्यः पूर्वमेव विद्यालयं त्यक्तवान् आसम्। भाविजीवनविषये यावच्चिन्त्यते तावदेव कुज्झटिकाभिर्निमज्जितोऽभवम्। दुर्बलतया विचरति मयि दैवात् स्वामिचरणानां रचनावली हस्तौ मे अलञ्चकार। द्वित्रं पृष्ठं दृष्ट्वैव अवगतोऽहं यदस्मिन् पुस्तके यद्वर्तते तदेव अन्वेषता मया एतानि दिनानि व्यतीतानि। वेणीमाधवदासमहोदयात् अहं सर्वं शिक्षितवान् परन्तु मनसि गूहितां काञ्चित् सत्तां विवेकानन्दः एव अजागरयत्।

ततः तत्प्रदर्शितमेव पन्थानं स्वजीवने अनुकरिष्यामीति चिन्तयन् श्रीरामकृष्णं प्रति कदा आकृष्टोऽहं न जाने। परिवारं विस्मरन् मम सन्न्यासजीवने रुचिः समेधिता। तदा पाठ्यपुस्तकापेक्षया दर्शनशास्त्राण्याधिक्येनाधीतवान् । १९१४ क्रिस्ताब्दे एकस्मात् मित्रात् किञ्चिदर्थम् ऋणीकृत्य परिवारमनुक्त्वैव तीर्थाटनाय निर्गम्य प्रसिद्धेषु स्थानेषु परिभ्रम्य काशीं सम्प्राप्तः। तत्रत्ये रामकृष्णाश्रमे गृहीताश्रयेण मया साकं रामकृष्णसङ्घस्य प्रसिद्धसन्न्यासिनः स्वामिब्रह्मानन्दस्य संलापोऽभूत्। तस्य वाणीषु प्रीतोऽहं रामकृष्णसङ्घस्य सन्न्यासी भविष्यामि इति सङ्कल्पितवान्।

अथैकदा मनसि गूहिता सा आकाङ्क्षा बेलुडमठे स्वामिब्रह्मानन्दमहाराजसमीपं मां सम्प्रेषयत्। क्रान्तदर्शी स्वामी मह्यमुपदिष्टवान् —— "सुभाष, नैष पन्थाः त्वत्कृते, त्वं देशाय स्वप्राणान् उत्स्रष्टुं शक्नुयाः, वीरो भव, देशवासिनः सेवस्व।" इति। तस्मादेव ब्रिटिशशासनदग्धस्वदेशवास्तव्यानां हितार्थं राजनैतिकदिशि पदसञ्चारो मम। ततः परं निखिलमुदन्तं – नान्तं तु सर्वैरेव ज्ञातं स्यादिति युष्माकं सुभाषः॥

## ॥ तथ्यमञ्जूषा ॥

### मलयमाइतिः, स्नातकतृतीयवर्षीयः

| | |
|---|---|
| 23 जनुवारी 1897 | सुभाषचन्द्रवर्यस्य जन्म । माता- भुवनेश्वरी देवी<br>पिता - जानकीनाथवसुः |
| जनुवारी 1920 | Protestant European School इति विद्यालये प्रविष्टः |
| 1913 | Presidency college इत्यत्र प्रविष्टः |
| 1918 | दर्शनशास्त्रे B.A.-परीक्षायामुत्तीर्णो जातः |
| 23 एप्रिल 1921 | Indian Civil Servic इत्यस्य वर्जनं कृतवान् |
| 1923 | सर्वभारतीयकांग्रेसदलस्य सभापतित्वेन निर्वाचितः |
| 1930 | कलिकातायाः महापौरः(Mayor) अभवत् |
| 19 जनुयारी1941 | स्वगृहात् पलायनं कृतवान् |
| 1943 | INA(Indian National Army)-नेतृत्वं गृहीतवान् |
| 18 अगस्त 1945 | नेताजीसुभाषचन्द्रबोसः अन्तर्हितः |

# ॥ युवकान् प्रति... ॥

## सुभाषचन्द्रवसुः

अस्माकं शतच्छिद्रयुतेन पूतिगन्धमयेन समाजेन न शक्यः पूर्णस्वाधीनतालाभः कदापि, पूर्णस्वाधीनतालाभाय भारतः खलु स्यात् मुक्तिसङ्ग्रामविभीषणः।...

स्वाधीनताप्रसङ्गे समेषां चेतसि भीतिरागच्छति। राष्ट्रियस्वाधीनतां विचिन्त्य मनसि शोणितस्रोतस्विनी, उद्बन्धनकाष्ठं तथा च सामाजिकस्वाधीनतां विचिन्त्य मनसि औद्धत्यविभीषिका आयाति। अहं तु उच्छृङ्खलतां विचिन्त्य भीतः नास्मि, मानवहृदये यदि भगवान् विराजते अथवा यदि मनुष्येषु मनुष्यत्वं स्यात्, यदि सत्यमेव भगवान् स्यात् —— यदि सत्यमेव मनुष्यः स्यात् —— तर्हि मनुष्यः सर्वदा मार्गभ्रष्टः भवितुं नार्हति। स्वाधीनतायाः मदिरां पीत्वा यदि वयं क्षणकालाय अनात्मस्थः भवेम तर्हि अचिरादेव वयम् आत्मस्थाः भवेम।...

हे वङ्गच्छात्राः, हे युवानः! यूयं पूर्णमुक्तेः अखण्डमुक्तेः उपासका भवेत। यूयमेव भविष्यद्भारतस्य उत्तराधिकारिणः, अतः यूयमेव गृह्णीत राष्ट्रियजागरणकर्तव्यम्। युष्मासु एव अस्ति अनन्तशक्तिः। अस्या एव शक्तेः उद्बोधनं कुरुत, अस्याः सञ्चारो भवतु अपरेषु, नूतनस्वाधीनतामन्त्रदीक्षितः नवभारतः जीवितो भवतु।...**(२१ जुलइ, १९२९, हुग्लीजेलाछात्रसम्मेलने सभापतेः भाषणतः)**

(अनुवादकः – आवीरलालगङ्गोपाध्यायः)

## ॥ विद्यालये ॥

### सुभाषचन्द्रवसुः

अहं विस्मितो भवामीदं चिन्तयित्वा यत् अपरः कश्चन कस्यचिद् विषये यच्चिन्तयति, तदाधारेणैव स जनः स्वात्मानं मन्यते। १९०९ क्रिस्ताब्दे जनुवारी मासि यदा अहं कटकस्य Ravenshaw Collegiate School इत्यत्र आसं तदा मयि अकस्मात् परिवर्तनमागतम्। यूरोपीयानां समीपम् आङ्ग्लभारतीयानां समीपं मम कौलीन्यस्य नासीत् सम्मानः, किन्तु भारतीयानां समीपं तु आसीत्। अपि च, मम आङ्ग्लज्ञानं साधारणम् अत्यशेत इति हेतोः अहं सहतीर्थानां समक्षं सम्माननीयः आसम्। किञ्च, शिक्षका अपि अहं परीक्षायां प्रथमो भविष्यामीति मनसि निधाय मयि कृपालवः आसन्।...प्रथमत्रैमासिकपरीक्षायाम् अहं तेषाम् आशानुरूपं फलं प्राप्तवान्। यस्मिन् परिसरे अहं वर्धित आसं तत्र मम मनसि आत्मनो विषये एवं भावः जागरितोऽभवद् यत् —— अहं क्षुद्रो जीवः नास्मीति। अयम्भावः मयि उद्भासितः, नैव गर्वः सः, अपि तु आत्मविश्वासः इति मे मतिः। यस्याभावेन मनुष्यः जीवने साफल्यं न प्राप्नुयात्, तस्याभावोऽपि तदा मया अनुभूतः।...

शिक्षकेषु एकः अन्यतमः...वेणीमाधवदासमहाभागः —— अस्माकं प्रधानशिक्षकः(Head Teacher)।...अहं तु एतत्सम्यक् अवगतवान् यत् स साधारणः कोऽपि शिक्षकः नास्ति, तस्य समवयस्केषु स न तु भिन्नः, अपि च तान् अतिशेते इति। आत्मानं चाहम् अबोधयं —— यदि जीवने आदर्शः कोऽपि ग्राह्यः, तर्हि तस्यैव अनुकरणं कार्यम् इति। **(भारतपथिके, पञ्चमपरिच्छेदतः)**

(अनुवादकः – आवीरलालगङ्गोपाध्यायः)